स्यानुतुदति यथा वैराजस्य Kṣudra. 3.6.

अनुतुन्न (anu-tunna) *adj.* repeatedly pushed अनुतोदो वैराजस्यानुतुन्नं हि वैराजम् PañcBr. viii. 9.13; JaimiBr. 3.60; यदृचा प्रस्तौति तत्प्रथमस्याह्नो रूपम् ... यदनुतुन्नं तच्चतुर्थस्य PañcBr. x. 9.1; JaimiBr. 3.333; PañcBr. x. 12.2; भेषजमेवैतेन प्रायश्चित्तिं कुर्वते। तदनुतुन्नं भवति JaimiBr. 3.66; 3.81; अनुतुन्नं यथा वैराजम् Kṣudra. 3.6 [depressed or repressed (in sound), muffled, MW.; unruffled, APTE]; *n.* repeated push अनुतुन्नाद्धि रेतो धीयते PañcBr. xii. 10.11; अनुतुन्नाद्वै प्रजाः पशवः प्रजायन्ते JaimiBr. 3.66; 3.97; 3.204; 3.238.

अनुतुन्नम् (anutunnam) *adv.* with repeated push अनुतुन्नं गायति तथा ह्येतस्याह्नो रूपम् PañcBr. xii. 9.17; आ(? अ)नुतुन्नं गायति रेतोधेयाय PañcBr. xii. 10.11.

अनुतुलिता (anu-tulitā) *adj.* (*f.*) [w. r. for अतुलिता] ŚaṅkaVi. (Ā.) 104.10.

अनुतूलन (anu-tūlana) *n.* rubbing (as the point or end of grass) with cotton [APTE]

अनुतूलय (anutūlaya-) *denom.* **i** to rub (something with the tip of grass) तूलैरनुकुष्णाति अनुतूलयति JaineVyā. 91.4 (*on* ii. 1.22); Cāndra-Vṛ. *on* i. 1.45; KāśiVṛ. *on* iii. 1.25; PrakriKau. ii. 384.5; **ii** to rub (as the point or end of grass) with cotton तूलेनानुकुष्णाति— अनुतूलयति। तृणाग्रं तूलेनानुघट्टयतीत्यर्थः SiddhāKau. 451A. 4 (*on* iii. 1.21)

अनुतृद् (anu-tṛd-) VII. P. to split open, to set free अहन्नहिमन्वपस्ततर्द ṚV. i. 32.1; SV. (Satavalekar's Ed.) 612; AV. ii. 5.5; AV. (P.) xiii. 6.1; ऋतस्य धारा अनु तृन्धि पूर्वीः ṚV. v. 12.2; अन्वपां खान्यतृन्तमोजसा ...। इन्द्रावरुणा ṚV. vii. 82.3.

अनुतृप् (anu-tṛp-) IV. U. to be pleased, to be satisfied ब्राह्मणेभ्योऽनुतृप्यन्ति (v.l. °तृप्यन्ते) पितरो देवतास्तथा MahāBhā. xiii. 30.5 [to take one's fill (or refreshment) after or later than another, MW.]

अनुतृप् (anu-tṛp-) X. P. to satisfy or to please तिलोदकैस्तर्पयित्वा स्वपितॄंश्च पितामहान्। प्रपितामहसंज्ञांश्च सदारानन्नुतर्पयेत् PāraS. 2.106.

अनुतृप्त (anu-tṛpta) *adj.* who has become pleased or satisfied एकत्रिंशत्पितृगणाः ... ते मेऽनुतृप्तास्तुष्यन्तु MārkP. 96.48.

अनुतॄ (anu-tṝ-) I.P. to cross, to overcome न वै दीक्षितं तरन्तं देवता अनुतरन्ति ... न वै दीक्षितं तरन्तं यज्ञोऽनुतरति MaiS. iii. 6.9 (iii. 73.12, 13); (कालि मातः) कटाक्षं ये तावकीनमनघे समुपालभन्त। ते दुस्तराण्यनुतरन्ति ParamāKā. 124.72 [to follow across or to the end, MW., APTE; to stretch lengthwise, APTE]

अनुतेजस् (anu-tejas) *n.* inferior or subordinate vigour सर्वाधिको ब्राह्मणस्तु जायते हि स्वकर्मणा। तत्तेजसोऽनुतेजांसि सन्ति च क्षत्रियादिषु ŚukraNī. 3.273.

अनुतोद (anu-toda) *m.* **A** repeated push अनुतोदो वैराजस्यानुतुन्नं हि वैराजम् PañcBr. viii. 9.13; **B** name of the two *sāmans* धृषतो मारुतस्य सामनी द्वे।... गृत्समदस्य मदौ द्वौ गौतमस्य वानुतोदौ ĀrṣeBr. iii. 11.6.

अनुतोदन (anu-todana) *m.* repeated push अनुतोदनात् पुनः पुनरभ्यासात् Sāy. *on* PañcBr. xii. 10.11.

अनुतोदवत् (anutoda-va(n)t) *adj.* having repeated push तदेतदभिपूर्वमेव शक्वरीणां रूपमुपगच्छन्ति। तास्वानूपमनुतोदवत् सिमानां रूपम् JaimiBr. 3.97.

अनुतोयधि (anutoyadhi) *adv.* along the sea-shore चक्रधरः ...। प्रतस्थे दक्षिणामाशां जिगीषुरनुतोयधि MahāP. 29.1.

अनुतोरणम् (anutoraṇam) *adv.* on the arches स्वभावभास्वरे भर्तुः देहे स्वानवकाशताम्। मत्वेवाभरणान्यास्थुरुद्बद्धान्यनुतोरणम् MahāP. 22.145.

अनुत्क (an-utka) *adj.* not over-anxious, not repentant or regretful, self-complacent अपरः कोकिलोऽन्वक्षं (v. l. °ऽनुत्कः) प्रतिश्रुत्केव कूजति BuddhaC. 4.51.

[1]**अनुत्कट** (an-utkaṭa) *adj.* [*f.* -ā] **1** not proud or haughty भवन्ति यस्याम् ...। अनुत्कटा नित्यविहस्तसंश्रया महारथा न द्विरदाः कदाचन RāghPāṇ. (Dha.) 1.44; **2** not prominent न रङ्गे अल्पतथात्वादिति तत्रानुत्कटा सा (रङ्गवृत्तिः) TattvCin. i. 495.2; मन्दप्रकाशजनकत्वमनुत्कटे चक्षुराद्यावरणे वस्त्रादावेव दृष्टम्, न तु उत्कटे कुड्यादौ JñānBiPra. 1.19 [ŚabdaRaSaK. 184.2 gives *anutkaṭa* as one of the meanings of *visrabdha*] [short, small, APTE]

[2]**अनुत्कट** (an-utkaṭa) *adj.* not in rut (*lit.* not having the temples open), RāghPāṇ.(Dha.) 1.44.

अनुत्कटकर्णकोश (anutkaṭa-karṇakośa) *adj.* having bud-like non-prominent (i.e. short) ears (बाणः) अनुत्कटकर्णकोशैः ... तुरङ्गैरारचितां मन्दुरां विलोकयन् HarṣaC. 100.3.

अनुत्कटत्व (anutkaṭa-tva) *n.* **1** the state of being non-predominant, non-predominance सत्त्वरजस्तमसां तूत्कटानुत्कटत्वविशेषात् सर्गवैचित्र्यं महदादिभेदेनाविरुद्धमेव TattvSaṁPañ. 18.11 (*on* 7); **2** [Inst.] **i** without clear appearance समवायन्यायो यत्र (भेदस्य) तस्यैवानुत्कटत्वेनावस्थानम् AlaṅkāSa. 192.10; **ii** because of non-clear appearance अनुपलब्धिस्त्वनुत्कटत्वेनाप्युपपद्यते SiddhāMu. 15.4 (*on* 35)

अनुत्कटपल्लव (anutkaṭa-pallava) *adj.* leaves of which are not prominently visible वटविटपिनस्तस्याङ्कूराननुत्कटपल्लवान् ... भिक्षुः प्रतिक्षणमीक्षते SubhāNī. 1.11.

अनुत्कटभेदत्व (anutkaṭabheda-tva) *n.* the state of not having clearly visible difference अनुत्कटभेदत्वमुत्कटभेदत्वं च संकरः AlaṅkāSa. 197.11.

अनुत्कटम् (anutkaṭam) *adv.* without difficulty, easily घटात् पटमुपायाति पटाद् घटमनुत्कटम्। चित्तमर्थेषु चरति पादपेष्विव मर्कटः ŚārṅgaPa. 4218.

अनुत्कटव्यभिचारिणी (anutkaṭavyabhicār-iṇī) *f.* woman whose infidelity is not apparently known तत्रानुत्कटव्यभिचारिणी सतीव भरणीया SmṛtiCan. iv. 568.16.

अनुत्कटाकाङ्क्षाप्रतिबन्ध (anutkaṭākāṅkṣā-pratibandha) *m.* obstruction of non-apparent expectancy अत उत्कटाकाङ्क्षयानुत्कटाकाङ्क्षाप्रतिबन्धान्न रङ्गे निवृत्तिः TattvCin. i. 495.3.

अनुत्कण्ठ (an-utkaṇṭha) *adj.* not having anxiety उत्कण्ठं त्वयि ...। स्वकुटुम्बमनुत्कण्ठं कुरु BṛKathāŚloSaṁ. 18.427; मुहूर्तकमनुत्कण्ठैरिह युष्माभिरास्यताम् BṛKathāŚloSaṁ. 21.23; किमेवं कठिनोऽभूस्त्वमनुत्कण्ठः कुटुम्बके PariPar. 13.114.

अनुत्कण्ठभुजङ्गम (anutkaṇṭha-bhujaṅgama) *adj.* in which the serpents are devoid of anxiety इदं पुरम्। पुनरागच्छता कार्यमनुत्कण्ठभुजङ्गमम् BṛKathāŚloSaṁ. 5.134.

अनुत्कण्ठा (an-utkaṇṭhā) *f.* absence of longing for (something) 'यः कौमारहरः' इत्याद्यु(? द्यनु)त्कण्ठाकारणसद्भावेऽपि अनुत्कण्ठाया अनुत्पत्तौ विशेषोक्तिः AlaṅkāSa. 200.8.

अनुत्कण्ठिताकुला (anutkaṇṭhitākulā) *adj.* (*f.*) afflicted (even) without longing for (something) अपीतमत्ताः शिखिनो दिशोऽनुत्कण्ठिताकुलाः। नीपोऽविलिप्तसुरभिरभ्रष्टकलुषं जलम् Kāvyālaṅ.(Bh.) 2.78.

अनुत्कर्णकोश (an-utkarṇakośa) *adj.* who has not lifted up or raised his bud-like ears (चन्द्रापीडः) अनुत्कर्णकोशम् ... इन्द्रायुधमालोक्यापि ... निरगान्नगर्याः Kād. 299.2.

अनुत्कर्ष (an-utkarṣa) *m.* **1** absence of drawing (of items from their original place to somewhere else), absence of putting off or lifting up (of items from their original place to somewhere else) दीक्षाकालस्य शिष्टत्वादतिक्रमे नियतानामनुत्कर्षः प्राप्तकालत्वात् MīmāSū. vi. 5.38; यद्येकवचनान्तं प्रातिपदिकं नोत्कृष्यते, प्रकरणादित्युच्यते, सिद्धस्तर्ह्यनुत्कर्षस्तदेवेदम् ŚābaBh. 1753.9 (*on* ix. 3.15); गौण्या वृत्त्या पूषादिशब्दैरन्याद्यभिधानादनुत्कर्षो भविष्यति TantrVā. 767.6 (*on* iii. 2.1); 396.4 (*on* ii. 1.16); उत्कृष्टेषूक्थ्येषु... षोडशिग्रहस्य ... अनुत्कर्षमाशङ्क्य क्रमः ... कालाद् बलीयान् TantrRa. 293.18; 287.8; संप्रतिपन्नदेवतत्वाच्च पयसा सह प्रदानमस्य (पुरोडाशस्य) इति प्रकरणाच्च मन्त्रानुत्कर्षात् प्रकरणमप्यनुगृह्यते SaṅkarKāBh. 15.24 (*on* i. 2.8); उत्कर्षोऽनुत्कर्षो वेत्यस्यां विप्रतिपत्तौ पाशं पाशानिति च मन्त्रयोर्विकल्पः स्यात् VedāntKa. 113.21 (*on* i. 1.12); 191.3 (*on* i. 3.40); स्वरविधीनामृगादिधर्मत्वपक्षे उच्चैस्साम्नेत्यस्यानुत्कर्षो वक्तुं शक्यः UpaParā. 13.3; पुरोडाशदेवतापदानां पश्वनङ्गतया ... दाक्षिणाग्निकहोमवदनुत्कर्षात् तानि तावत् सवनीयपुरोडाशेडाभक्षणोत्तरकालं पठनीयानि BhāṭṭDī. iv. 193.13 (*on* xi. 3.15); **2** absence of excellence, inferiority सत्त्वत्यागादनुत्कर्षो वाक्यादेर्दैन्यमुच्यते SaraKaṇṭhā. 590.3; असत्प्राधान्यं क्वचिद्वाक्यादनुत्कर्षेण Kāvyānu.(He.) 125.1.

अनुत्कर्षण (an-utkarṣaṇa) *n.* absence of elevation न ह्यन्यं प्रति स्वभावोऽतद्भावो भवति, तस्य तेनापकर्षणात् अन्येन चानुत्कर्षणात् PramāVāSvopVṛ. 105.18.

अनुत्कर्षपक्ष (anutkarṣa-pakṣa) *m.* view of absence of drawing (of items) अनुत्कर्षपक्षेऽप्युक्थ्यपरभावो बाध्येत ŚāstrDī. 419.16 (*on* v. 1.18)

अनुत्कर्षप्रतिपादक (anutkarṣa-pratipādaka) *adj.* indicative of the absence of excellence यत्त्वनुत्कर्षप्रतिपादकं ऋष्यशृङ्गवचनम्।... तच्छन्दोगविषयम् CaturCin. iii(2). 397.16.